स्येति” ज्योतिषम् । (अनलः कृत्तिका) एवं यथायथमुदाहार्य्यम् ।

अग्न्यभिमानिनश्च देवाः कुत उत्पन्नाः? कस्मिन् कस्मिन् कर्म्मणि? वा तेषामधिष्ठातृत्वं तदुक्तं भारते ।

अङ्गिरा उवाच कुरु पुण्यं प्रजासर्गं भवाग्निस्तिमिरापहः । मां च देव! कुरुष्वाग्ने! प्रथमं पुत्त्रमञ्जसा ॥ तच्छ्रुत्वाऽङ्गिरसो वाक्यं जातवेदास्तदाऽकरोत् । राजन्! । बृहस्पतिर्नाम तस्याप्यङ्गिरसः सुतः । ज्ञात्वा प्रथमजं तन्तु वह्नेराङ्गिरसं सुतम् । उपेत्य देवा पप्रच्छुः कारणं तत्र भारत । स तु पृष्टस्तदा देवैस्ततः कारणमब्रवीत् । प्रत्यगृह्णंस्तु देवाश्च तद्वचोऽङ्गिरसस्तदा । तत्र नानाविधानग्नीन् प्रवक्ष्यामि महाप्रभान् । कर्म्मभिर्ब्बहुभिः ख्यातान्नानार्थान् ब्राह्मणेष्विह । व०मार्क० स० २१६ अध्या०

अङ्गिरसो यस्तृतीयस्तु पुत्त्रः कुरुकुलोद्वह! । तस्याभवत् शुभा भार्य्या प्रजास्तस्याश्च मे शृणु । बृहत्कीर्त्तिर्बृहज्ज्योतिर्बृहद्ब्रह्मा बृहन्मनाः । बृहन्मन्त्रो बृहद्भासस्तथा राजन्! बृहस्पतिः । प्रजासु तासु सर्व्वासु रूपेणाप्रतिमाऽभवत् । देव! भानुमती नाम प्रथमाऽङ्गिरसः सुता । भूतानामिव सर्व्वेषां तस्यां रागस्तदाऽभवत् । रागाद्रागेति यामाहुर्द्वितीयाऽङ्गिरसः सुता । यां कपर्द्दिसुतामाहुर्दृश्यादृश्येति देहिनः । तनुत्वात् सा सिनीवाली तृतीयाऽङ्गिरसः सुता । पश्यत्यर्च्चिष्मती भाभिर्हविर्भिश्च हविष्मती । महामखेष्वाङ्गिरसी दीप्तिमत्सु महामते! । महायतीति विख्याता सप्तमी कथ्यते सुता । यान्तु दृष्ट्वा भगवतीं जनः कुहुकुहायते । एकानंशेति तामाहुः कुहूमङ्गिरसः सुताम् । २१७ अ०

बृहस्पतेश्चान्द्रमसी भार्य्याऽभूद्या यशस्विनी । अग्नीन् साऽजनयत् पुत्रान् षडेकाञ्चापि पुत्त्रिकाम् । आहुतिष्वेव यस्याग्नेर्हविषाज्यं विधीयते । सोऽग्निर्बृहस्पतेः पुत्त्रः शंयुर्नाम महाव्रतः । चातुर्म्मास्येषु यस्येष्ट्यामश्वमेधेऽग्रजः पशुः । दीप्तो ज्वालैरनेकाभैरग्निरेषोऽथ वीर्य्यवान् । शंयोरप्रतिमा भार्य्या सत्याऽसत्याऽथ धर्म्मज! ॥ अग्निस्तस्य सुतो दीप्तस्तिस्रः कन्याश्च सुव्रताः प्रथमेनाज्यभागेन पूज्यते योऽग्निरध्वरे । अग्निस्तस्य भरद्वाजः प्रथमः पुत्त्र उच्यते पौर्ण्णमास्येषु सर्व्वेषु हविषाज्यं स्रुचोद्यतम् । भरतो नामतः सोऽग्निर्द्वितीयः शंयुतः सुतः । तिस्रः कन्या भवन्त्यन्या यासां स भरतः पतिः । भरतस्तु सुतस्तस्य भरत्येका च पुत्त्रिका । भरतो भरतस्याग्नेः पावकस्तु प्रजापतेः । महानत्यर्थमहितस्तथा भरतसत्तमः । भरद्वाजस्य भार्य्या तु वीरा वीरस्य पिण्डदा । प्राहुराज्येन तस्येज्यां सोमस्येव द्विजाः शनैः । हविषा यो द्वितीयेन सोमेन सह युज्यते । रथप्रभुरथाध्वानः कुम्भरेताः स उच्यते । सरय्वां जनयन् सिद्धिं भानुं भाभिः समावृणोत् । आग्नेयं मानयन्नित्यमाधाने ह्येष स्तूयते । यस्तु न च्यवते नित्यं यशसा वर्च्चसा श्रिया । अग्निर्निश्च्यवनो नाम पृथिवीं स्तौति केवलम् । विपाप्मा कलुषैर्मुक्तो विशुद्धश्चार्च्चिषा ज्वलन् । विपापोऽग्निः सुतस्तस्य सत्यः समयधर्म्मकृत् । अक्रोशतां हि भूतानां यः करोति हि निष्कृतिम् । अग्निः स निष्कृतिर्नाम शोभयत्यभिसेवितः । अनुकूजन्ति येनेह वेदनार्त्ताः स्वयं जनाः । तस्य पुत्त्रः स्वनो नाम पावकः स रुजस्करः । यस्तु विश्वस्य जगतो बुद्धिमाक्रम्य तिष्ठति । तं प्राहुरध्यात्मविदो विश्वजिन्नामपावकम् । अन्तरग्निः स्मृतो यस्तु भुक्तं पचति देहिनाम् । स जज्ञे विश्वभुङ्नाम सर्व्वलोकेषु भारत! । ब्रह्मचारी यतात्मा च सततं विपुलव्रताः । ब्राह्मणाः पूजयन्त्येनं पाकयज्ञेषु पावकम् । पवित्रा गोतमी नाम नदी यस्याऽभवत् प्रिया । तस्मिन् कर्म्माणि सर्व्वाणि क्रियन्ते धर्म्मकर्तृभिः । वडवाग्निः पिबत्यम्भो योऽसौ परमदारुणः । ऊर्द्ध्वभागूर्द्ध्वभाङ्नाम कविः प्राणाश्रितस्तु यः । उदग्धारं हविर्यस्य गृहे नित्यं प्रदीयते । ततः स्विष्टं भवेदाज्यं स्विष्टकृत् परमः स्मृतः । यः प्रशान्तेषु भूतेषु मन्युर्भवति पावकः । क्रुद्धस्य तरसा जज्ञे मनयन्ती चाथ पुत्त्रिका । स्वाहेति दारुणा क्रूरा सर्व्वभूतेषु तिष्ठति । त्रिदिवे यस्य सदृशो नास्ति रूपेण कश्चन अतुल्यत्वात् कृतो देवैर्नाम्ना कामस्तु पावकः । संहर्षाद्धारयन् क्रोधं धन्वी स्रग्वी रथे स्थितः समये नाशयेच्छत्रून् अमोघो नाम पावकः । उक्थो नाम महाभाग । त्रिभिरुक्थैरभिष्टुतः । महावाचन्त्वजनयत् समाश्वासं हि यं विदुः । २१८ अ०

काश्यपो ह्यथ वाशिष्ठः प्राणश्च प्राणपुत्त्रकः । अग्निराङ्गिरसश्चैव च्यवनस्त्रिसुवर्च्चकः । अचरत् स तपस्तीव्रं पुत्त्रार्थे बहुवार्षिकम् । पुत्त्रं लभेयं धर्म्मिष्ठं यशसा ब्रह्मणा समम् । महाव्याहृतिभिर्ध्यातः पञ्चभिस्तैस्तदा त्वथ । जज्ञे तेजो महार्च्चिष्मान् पञ्चवर्णः प्रभावनः । समिद्धोऽग्निः शिरस्तस्य बाहू सूर्य्यनिभौ तथा । त्वङ्नेत्रे च सुवर्णाभे कृष्णे जङ्घे च भारत! । पञ्चवर्णः स तपसा कृतस्तैः पञ्चभिर्जनैः । पाञ्चजन्यः श्रुतो देवः पञ्चवंश-